## शल इगुपधादनिटः क्सः। (४५/२३३६)

शलन्तो यो धातुरिगुपधस्तस्मात् परस्य च्लेः अनिटः क्स आदेशो भवति। दुह[1] – अधुक्षत्। लिह – अलिक्षत्। शलः इति किम्? अभैत्सीत्। अच्छैत्सीत्। इगुपधात् इति किम्? [2]अधाक्षीत्। अनिटः इति किम्? अकोषीत्। [3]अमोषीत्॥

## श्लिष आलिङ्गने। (४६/२५१४)

श्लिषेः (धा. पा. ११८७) धातोः आलिङ्गन[4]क्रियावचनात् परस्य च्लेः क्सः आदेशो भवति। आलिङ्गनम् उपगूहनं, परिष्वङ्गः। [5]अत्र नियमार्थमेतत्। आश्लिक्षत् कन्यां देवदत्तः। आलिङ्गने इति किम्? समाश्लिषज्जतु काष्ठम् (म. भा. २.५४)॥

## न दृशः। (४७/२४०७)

पूर्वेण क्सः प्राप्तः (३.१.४५/२३३६) प्रतिषिध्यते। दृशेः धातोः परस्य च्लेः क्सादेशो न भवति। [6]अस्मिन् प्रतिषिद्धे '[7]इरितो वा' (३.१.५७/२२६९) इति अङ्सिचौ भवतः। अदर्शत्, अद्राक्षीत्॥

## णिश्रिद्रुस्रुभ्यः कर्तरि चङ्। (४८/२३१२)

सिजपवादश्चङ विधीयते। ण्यन्तेभ्यो धातुभ्यः, श्रि द्रु स्रु इत्येतेभ्यश्च परस्य च्लेः चङादेशो भवति कर्तवाचिनि लुङि परतः। ङकारो गुणवृद्धिप्रतिषेधार्थः, चकारः 'चङि' (६.१.११/२३१५) इति विशेषणार्थः। अचीकरत्। अजीहरत्। अशिश्रियत्। [8]अदुद्रुवत्। असुस्रुवत्। कर्तरि इति किम्? अकारयिषातां कटौ देवदत्तेन।

[२०८] कमेरुपसङ्ख्यानम्।

'आयादयः आर्धधातुके वा' (३.१.३१/२३०५) इति यदा णिङ नास्ति तदैतत् उपसङ्ख्यानम्। अचकमत। णिङपक्षे सन्वद्भावः। अचीकमत।

नाकमिष्टसुखं यान्ति सुयुक्तैर्वडवारथैः।
अथ पत्काषिणो यान्ति येऽचीकमतभाषिणः॥ (म.भा. २.५५)

## विभाषा धेट्श्व्योः। (४९/२३७५)

'धेट् पाने' (धा. पा. ९०३), 'टुओश्वि गतिवृद्ध्योः' (धा. पा. १०११), एताभ्या[9]मुत्तरस्य च्लेर्विभाषा चङादेशो भवति। धेटस्तावत् – अदधत्। सिच्पक्षे 'विभाषा घ्राधेट्शाच्छासः' (२.४.७८/२३७६) इति लुक्। अधात्। अधासीत्। श्वयतेः खल्वपि। अशिश्वियत्। अङोऽप्यत्र विकल्प इष्यते। अश्वत्। अश्वयीत्। कर्तरि इत्येव, अधिषातां गावौ वत्सेन॥

---

1. प्रपूरणे इत्यधिकम् ग. 2. दहधातुः इत्यधिकम् ङ. 3. अपोषीत् ब, नास्ति अ. 4. °क्रियात् ब. 5. तत्र ब. ह. 6. तस्मिन् विप्रतिषिद्धे ह. 7. इरितश्च क. 8. नास्ति ब. 9. परस्य ह.